SUBJECT- SANSKRIT(H)

COURSE CODE-AHSNS202C-4

COURSE TITLE- CLASSICAL SANSKRIT LITERATUE(DRAMA)

COURSE TOPIC- SWAPNAVĀSAVADATTAM

(स्वप्नवासवदत्तम्)

**निष्क्रमन् सम्भ्रमेणाहं द्वारपक्षेण ताडितः।**

**ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथः।।(अङ्कः 5. श्लोकः 7)**

श्लोकोऽयं महाकविना भासेन विरचितं 'स्वप्नवासवदत्तमि'ति नाटकस्य पञ्चमाङ्के उपलभ्यते।

यदा राजा उदयनः समुद्रगृहे पद्मावतीं न दृष्टवान्, तदा स तस्यां शय्यायां सुप्तः। वासवदत्तापि तत्र आगत्य किञ्चित्कालं यावत् स्थित्वा राज्ञः प्रलम्वमानं करमुत्थाप्य शय्यायाम् आरोप्य गन्तुमिच्छति। तस्याः करस्पर्शेन उद्बुद्धो राजा तां धर्त्तुं वेगेन गतः, परन्तु द्वारेन ताडितः, तावत् सा पलायिता। श्लोकेऽस्मिन् तदेव वर्णयन्नाह राजा- निष्क्रामन्निति।

सम्भ्रमेण त्वरया निष्क्रामन् निर्गच्छनहम् उदयनः द्वारपक्षेण ताडितः द्वारस्य पार्श्वभागेन आहतोऽस्मि। ततः तस्मात् कारणात् अहं व्यक्तं स्पष्टं न जानामि न वेद्मि, यत् अयं वासवदत्तायाः स्पर्शरूपः मनोरथः अभिलाषः भूतार्थः सत्यरूपः। राजा वासवदत्तामुखं द्रष्टुं समर्थो नाभूत्, अतः सा स्पष्टं कथयितुं न शक्नोति यत् वासवदत्ता जीवत्येव, परं तु तस्य मनसि दृढः भावः जातः यत् सा जीवति। अतएव नाटकस्यान्ते यदा वासवदत्ता उदयनस्य समक्षे आनीता तदा स चकितो नाभवत्।

श्लोकेऽस्मिन् अनुष्टुप् नाम वृत्तमुपलभ्यते।